वीरतरासनं, स्त्री, ( वीरतराणां साधकश्रेष्ठानां आसनम् । ) आसनविशेषः । यथा,—

"स्मृतु कोमलमास्तीर्य्य संग्रामपतितं हि यत् ।
जन्तुव्यापादितं वापि स्मृतं वा नरमासनम् ॥
गर्भच्युतं त्वचं वापि नारीणां योनिजां त्वचम् ।
सर्व्वसिद्धिप्रदं देवि सर्व्वतोऽतिसमृद्धिदम् ।
त्वचं वा यौवनस्थानां कुर्य्याद्वीरतरासनम् ॥"
इति मुण्डमालातन्त्रे ३ पटलः ॥

वीरतरुः, पुं,(वीरस्तरुनाम्ना ख्यातस्तरुः ।) अर्ज्जुनवृक्षः । इत्यमरः ॥ कोकिलाक्षवृक्षः । इति रत्नमाला । विल्वान्तरवृक्षः । भल्लातकः । इति राजनिर्घण्टः ॥

वीरपर्णं, स्त्री, सुरपर्णम् । इति राजनिर्घण्टः ॥

वीरपत्नी, स्त्री, ( वीराणां पत्नी । यद्वा, वीरः पतिर्य्यस्याः । "नित्यं सपत्न्यादिषु ।" ४।१।३५। इति पत्युर्नकारादेशः । "ऋन्नेभ्यो ङीप् ।" ४।१।५। इति ङीप् । ) वीरभार्य्या । इत्यमरः ॥ (यथा, मार्कण्डेये । १२५ । ७ ।

"तेषामेतद्वचः श्रुत्वा वीरा वीरप्रजावती ।
वीरगोत्रसमुद्भूता वीरपत्नी प्रहर्षिता ॥"

नदीविशेषः । यथा, ऋग्वेदे ।१।१०४।४।

"अञ्जसी कुलिशी वीरपत्नी
पयो हिन्वाना उदभिर्भरन्ते ॥"

"वीरपत्नी वीरस्य पालयित्री एतत्संज्ञितास्तिस्रो नद्यः ।" इति तद्भाष्ये सायणः ॥)

वीरपत्रा, स्त्री, ( वीरप्रियाणि पत्राणि यस्याः । ) विजया । इति राजनिर्घण्टः ॥

वीरपानं, स्त्री, वीराणां श्रमनाशाय पानम् । यथा,—

"वीरपानन्तु यत् पानं वृत्ते भाविनि वा रणे ।"
इत्यमरः ॥

("वा भावकरणयोः ।" ८ । ४ । १० । इति विकल्पेन णत्वमपि । यथा, गो॰ रामायणे । ४ । ६ । ७२ ।

"मत्तोऽयमिति दुर्ब्बुद्धे मोहान्मामवमन्यसे ।
मदीये संप्रहारेऽस्मिन् वीरपाणं समर्थ्यताम् ॥")

वीरपुष्पी, स्त्री, सिन्दूरपुष्पी । इति राजनिर्घण्टः ॥

वीरबाहुः, पुं, ( वीराः समर्थाः बाहवो यस्य । ) विष्णुः । यथा, "वीरबाहुर्विदारणः ।" इति तस्य सहस्रनामस्तोत्रम् ॥ ( धृतराष्ट्रपुत्रान्यतमः । यथा, महाभारते । १ । ६७ । १०३ ।

"उग्रो भीमरथो वीरो वीरबाहुरलोलुपः ॥"

रावणपुत्रः । इति रामायणम् ॥ वानरविशेषः । यथा, गो॰ रामायणे । ६ । १७ । १५ ।

"वीरबाहुः सुबाहुश्च नलश्च वनगोचरः ।")

वीरभद्रः, पुं, (वीराणां भद्रं येन ।) अश्वमेधाश्वः । वीरश्रेष्ठः । वीरणम् । इति मेदिनी ॥ शिवगणविशेषः । तस्योत्पत्तिर्यथा,—

"इत्याकर्ण्य महाकालः सम्यक् ज्ञात्वा सतीक्षयम् ।
सद्यः सुने सती देवी त्यक्ताप्ता स्वजीवितम् ॥
जीवं स्थिते सुतौ तत्र तन्महाकालसाध्वसात् ।
रुद्रस्यातीवरौद्रोऽभूत् बहुकोपाग्निदीपितः ॥
ततस्तत्क्रोधजाद्वह्नेराविरासीन्महाद्युतिः ।
प्रत्यक्षः प्रतिमाकारः कालस्त्वत्युः प्रकम्पनः ॥
उवाच च प्रणम्येशं भूसुण्डीं महतीं दधत् ।
आज्ञां देहि पितः किन्ते करवै दास्यमुत्तमम् ।
ब्रह्माण्डमेककवलं करवाणि त्वदाज्ञया ॥
इति प्रतिज्ञां तस्येशः श्रुत्वा कृतममन्यत ।
कृतकृत्यमिवात्यन्तं तं मुदा प्रत्युवाच ह ॥
महावीरोऽसि रे भद्र मम सर्व्वगणेष्विह ।
वीरभद्राख्यया हि त्वं प्रथितिं परमां व्रज ।
कुरु मे सत्वरं कार्य्यं दक्षयज्ञं क्षयं नय ॥"
इति काशीखण्डे ८६ अध्यायः ॥

( यथा च महाभारते । १२ । २८३ । ५१ ।

"वीरभद्र इति ख्यातो रुद्रकोपाद्विनिःसृतः ।
भद्रकालीति विख्याता देव्याः कोपाद्विनिःसृता ॥")

वीरभद्रकं, स्त्री, ( वीरभद्रमेव । स्वार्थे कन् । ) वीरणम् । इति जटाधरः ॥

वीरभार्य्या, स्त्री, ( वीराणां भार्य्या । ) वीरपत्नी । इत्यमरः ॥

वीरमाता, [ ऋ ] स्त्री, ( वीराणां माता । ) वीरजननी । तत्पर्य्यायः । वीरसूः २ । इत्यमरः ॥ ( यथा, भागवते । ६ । १४ । ४० ।

"अन्तर्व्वत्नीमुपालक्ष्य देवीं स प्रययौ पुरीम् ।
पुनस्तत्र गतोऽब्दान्ते उर्व्वशीं वीरमातरम् ॥")

वीररजः, [स्] स्त्री, ( वीराणां वीरभाविनां धारणार्थं रजः । ) सिन्दूरम् । इति राजनिर्घण्टः ॥ वीरस्य धूलिश्च ॥

वीररेणुः, पुं, (वीरा रेणव इव यस्य ।) भीमसेनः । इति त्रिकाण्डशेषः ॥

वीरवती, स्त्री, मांसरोहिणी । इति भावप्रकाशः ॥ ( विक्रमपुराधीश्वरविक्रमतुङ्गनृपकर्म्मचारिवीरवरस्य कन्या । यथा, कथासरित्सागरे । ५३ । ६० ।

"यस्य धर्म्मवती नाम भार्य्या वीरवती सुता ।
पुत्त्रः सत्ववरश्चेति त्रयं परिकरो गृहे ॥")

वीरवत्सा, स्त्री, ( वीरो वत्सः पुत्त्रो यस्याः । ) वीरजननी । इति जटाधरः ॥

वीरविप्लावकः, पुं, शूद्रद्रव्येण होमकर्त्ता । यथा,—

"वीरविप्लावको जुह्वन् धनैः शूद्रसमाहितैः ।"
इति हेमचन्द्रः ॥

वीरवृक्षः, पुं, ( वीरनामको वृक्षः । ) भल्लातकः । इत्यमरः ॥ अर्ज्जुनवृक्षः ॥ इति हेमचन्द्रः ॥ विल्वान्तरः । इति राजनिर्घण्टः ॥ वृक्षविशेषः । देधान इति भाषा । तत्पर्य्यायः । वीरतरः २ वृहद्दातः ३ अक्षरीहरः ४ । इति रत्नमाला ॥

वीरसूः, स्त्री, (वीरान् पुत्त्रानेव सूते इति । वीर + सू + क्विप् । ) वीरमाता । इत्यमरः ॥ (यथा, महाभारते । १ । २०० । ७ ।

"जीवसूर्व्वीरसूर्भद्रे बहुसौख्यसमन्विता ।
सुभगा भोगसम्पन्ना यज्ञपत्नी पतिव्रता ॥"

पुत्त्रप्रसविनी । यथा, ऋग्वेदे ।१०।८५।४४।

"वीरसूर्देवकामा स्योना शन्नो भवद्विपदे शं चतुष्पदे ॥"

"वीरसूः पुत्त्राणामेव सवित्री ।" इति तद्भाष्ये सायणः ॥)

वीरसेनं, स्त्री, आरूकवृक्षः । इति राजनिर्घण्टः ॥

वीरसेनः, पुं, नलराजपिता । इति नैषधम् ॥ (यथा, महाभारते । ७ । ५२ । ५४ ।

"निषधेषु महीपालो वीरसेन इति श्रुतः ।
तस्य पुत्त्रोऽभवन्नाम्ना नलो धर्म्मार्थकोविदः ॥")

वीरसेनजः, पुं, ( वीरसेनात् जायते इति । जन + डः । ) नलराजः । इति नलोदयः ॥

वीरहा, [ न् ] पुं, ( वीरान् हन्तीति । हन + क्विप् । ) नष्टाग्निब्राह्मणः । इत्यमरः ॥ यस्याग्निहोत्रिणः प्रमादादिना कारणान्तरेण वा अग्निर्नष्टो निर्व्वाणः स्यात् स वीरहोच्यते । वीरयति शौर्य्यं कारयति इति वीर इ त् क तु शौर्य्ये इत्यस्मात् चुरादि णिः प्रेरणे पश्चात् पचाद्यनि वीरो यज्ञाग्निः तं हतवान् इति क्विपि वीरहा । इति भरतः ॥ ( यथा, वाजसनेयसंहितायाम् । ३० । ५ । "नरकाय वीरहणम् ।" "वीरहणं नष्टाग्निं शूरं वा ।" इति तद्भाष्यम् ॥ ) विष्णुः । यथा । वीरहा माधवो मधुः । इति विष्णुसहस्रनाम । वीरहन्तरि, त्रि ॥

वीरा, स्त्री, सुरा । क्षीरकाकोली । तामलकी । एलवालुका । पतिपुत्त्रवती । रम्भा । विदारी । दुग्धिका । मलपूः । क्षीरविदारी । इति मेदिनी । रे, ६८ ॥ पुस्तकान्तरे सुरास्थाने सुरा विदारीस्थाने गम्भारी इति पाठः । काकोली महाशतावरी । गृहकन्या । ब्राह्मी । अतिविषा । मदिरा । इति राजनिर्घण्टः ॥ शिंशपावृक्षः । इति रत्नमाला ॥ (करन्धमराजपत्नी । यथा, मार्कण्डेये । १२३ । १ ।

"वीर्य्यचन्द्रसुता सुभ्रूर्व्वीरा नाम शुभव्रता ।
स्वयंवरे सा जगृहे महाराजं करन्धमम् ॥"

नदीविशेषः । यथा, महाभारते ।६।६।२२।

"पूर्व्वाभिरामां वीराञ्च भीमा मोघवतीं तथा ॥"

विक्रमशालिनी । यथा, मार्कण्डेये ।१२५।७।

"तेषामेतद्वचः श्रुत्वा वीरा वीरप्रजावती ।
वीरगोत्रसमुद्भूता वीरपत्नी प्रहर्षिता ॥")

वीराम्लः, पुं, अम्लवेतसः । इति राजनिर्घण्टः ॥

वीरारुकं, स्त्री, आरूकम् । इति राजनिर्घण्टः ॥

वीराशंसनं, स्त्री, ( वीरान् आशंसयति अद्य स्थास्यामि वा नवेति चिन्तां जनयतीति । आ + शंस + णिच् + ल्युः । ) अतिभयप्रदा युद्धभूमिः इत्यमरः ॥

वीरासनं, स्त्री, ( वीराणां साधकानामासनम् । ) भिक्षाटनाद्यनाश्रित्योपवेशनम् । यथा,—

"दिवाशुगच्छेत्ता गास्तु तिष्ठन्नूर्द्ध्वं रजः पिबेत् ।